एषं सौत्रं धातुमाहुः तन्मते भावे क्रुञ्चते इत्येव। एतन्मते क्रुङ् इत्यत्र क्विनि नलोपाभावे न निपातकल्पना

क्रुन्थ क्लेशे स्लेषे च क्र्या० पर० अक० सेट् हलायुधः। क्रुथ्नाति अक्रुन्थीत् चुक्रुन्थ अयमपाणिनीयः

क्रुमु त्रि० क्रम—उन् वेदे पृषो०। सर्व्वत्र क्रमणशीले "क्रुमुर्मा वः सिन्धुर्निरीरमत्" ऋ० ५।५३।९। "क्रुमुः सर्व्वत्र क्रमणशीलः" भा०

क्रुमुक पु० क्रम—उक वेदे पृषो०। गुवाके "क्रुमुकमपि कुर्य्यात् एषा वा अग्नेः प्रिया तनुः यत्क्रुमुकः" तैत्ति०५।१०९।५

क्रुश रोदने अक० आह्वाने आक्रोशे च सक० भ्वा० प० अनिट्। क्रोशति अक्रुक्षत्। चुक्रोश क्रोक्ष्यति। क्रोष्टा क्रुष्टः क्रोशन् क्रोशः क्रोशनः क्रोष्टुः। "रसन्नरण्यान्यां सायमक्रुक्षदिति मन्यते" ऋ० १०।१४६।४ "इहद्वदन्ति मदिरेण मन्दिनेन्द्रं क्रोशन्तोऽविदन्नना मधु" ऋ०१०।९४।४ "एष क्रोशति दात्यूहस्तं शिखी प्रतिकूजति" रामा० अयो०५६अ०। कर्म्मणि क्रुश्यते अक्रोशि "इतिक्रुधाक्रुश्यत तेन केतकम्" नैष०

अत्याद्युपसर्गात् परस्तु तत्तद्द्योत्यार्थयुक्ते रोदनादौ

अनु+दयायाम् अनुरोदने च सक०। अनुक्रोश (दया) "न तायुमनुक्रोशन्ति क्षितयोभरेषु" ऋ० ४।३८।५ "किमनुक्रुश्य वैकल्यमुत्पादयसि मेऽनघ!" भा०अनु०५अ०

आ+अप्रियकथने सक०। "शतं ब्राह्मणमाक्रुश्य क्षत्रियोदण्डमर्हति" मनुः। "प्रत्याक्रोशेदिहाक्रुष्टः" भा० अनु० ४५६२श्लो०। "आक्रुष्टः पुरुषः सर्व्वं प्रत्याक्रोशेदनन्तरम्" भा० व० १९१श्लो०। "हा प्रिये! क्वासि नष्टासि व्याक्रोशन्नपतत् क्षितौ" रामा० आ० ८६अ०

उद्+उच्चैराह्वाने सक० "उदक्रोशन् स पाण्डवान्" भा० आ० ७४८श्लो०। उच्चै रोदने च अक०

क्रुश्वन् पुंस्त्री क्रुश—क्वनिप्। शृगाले उज्ज्वल० स्त्रियां ङीप् रश्चान्तादेशः क्रुश्वरी। [ताप्रिये २आहूते च त्रि०।

क्रुष्ट न०क्रुश—भावे क्त। १रोदनरवे। कर्म्मणि क्त। २कथि-

क्रूड क्रुडवत्। क्रूडति अक्रूडीत् चुक्रोड "तस्य रेतः परापतत् तदग्निर्योनिनोपागृह्णादयसा तदक्रूडयत्तत् क्रूड्यमानं गवि न्यदधत् तदिदं पयः" स्रुतिः।

क्रूर त्रि० क्लत—रक् धातोः क्रूः। १निर्दये २कठिने अमरः ३हिंसके ४उग्रे च मेदि०। "तस्याभिषेकसंभारं कल्पितं क्रूरनिश्चया" रघुः। "तस्मिन्नुपायाः सर्व्वेनः क्रूरे प्रतिहतक्रियाः" कुमा०। "दृढकारी मृदुर्दान्तः क्रूराचारैरसंवसन्" मनुः। तस्य भावः ष्यञ् क्रौर्य्यं न०, तल् क्रूरता स्त्री, त्व क्रूरत्व न०, निर्द्दयत्वे हिंसने काठिन्ये उग्रत्वे च। "ओजोऽथ युग्मं विषमः समश्च क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च। चरस्थिरद्व्यात्मकनामधेया मेषादयोऽमी क्रमशः प्रदिष्टाः" दीपिकोक्ते मेषादिषु मध्ये ५विषमराशौ पु० "अर्कार्नेन्द्वर्कसौरारा: पापाः सौम्यास्तथा परे। पापयुक्तोबुधः पापोराहुकेतू च पापदौ" ज्योति० उक्ते ६ग्रहभेदे च "यथा दृष्टफला क्रूरास्तथा सौम्याः शुभप्रदाः। क्रूरयुक्तः पुनः सौम्योज्ञेयः क्रूरफलप्रदः" "इदञ्च सौम्यक्रूराणां फलं स्थानवशात् समम्। एतदेव फलं विद्धि सौम्यैः क्रूरैर्विपर्य्ययात्" "ग्रहाः सौम्यास्तथा क्रूरा वक्राः शीघ्रोच्चनीचगाः" इति "तिथिराश्यंशनक्षत्रं विद्धं क्रूरग्रहेण यत्। सर्व्वेषु शुभकार्य्येषु वर्ज्जयेत्तत् प्रयत्नतः। न नन्दति विवाहे च यात्रायां न निवर्त्तते। रोगाद्विमुच्यते रोगी वेधवेलाकृतोद्यमः। रोगकाले भवेद्वेधः क्रूरखेचरसम्भवः" "क्रूरावक्रा महाक्रूरा इति च ज्यो० त० पापग्रहार्थपरतया क्रूरशब्दप्रयोगात्। क्रूरवेधप्रकारस्तु चक्रशब्दे सर्व्वतोभद्रचक्रे वक्ष्यते। ७रक्तकरवीरे पु०८श्येनपक्षिणि ९कङ्कपक्षिणि च पुंस्त्री० राजनि० स्त्रियां जातित्वात् ङीप्। १०रक्तपुनर्णवायां स्त्री राजनि०

क्रूरकर्म्मन् त्रि० क्रूरं हिंसकं कर्म्म यस्य। १हिंसाकर्म्मकारिणि "क्रूरकर्म्मकृताञ्चैव शतशोगुरुतल्पगः" मनुः। २कटुतुम्बिनीवृक्षे पु० राजनि०।

क्रूरकोष्ठ त्रि० क्रूरं कठिनं कोष्ठं यस्य। धातुवैषम्यकृते बद्धकोष्ठाशये। "क्रूरकोष्ठस्यातितीक्ष्णाग्नेरल्पमौषधमल्पगुणं वा भक्तवत् पाकमुपैति तत्र समुदीर्णदोषा यथाकालमनिर्ह्रियमाणा व्याधिं बलविभ्रमञ्चापादयन्ति" सुश्रु०।

क्रूरगन्ध पु० क्रूर उग्रोगन्धोऽस्य। १गन्धके राजनि० २तीक्ष्णगन्धमात्रे त्रि० क्रूरः गन्धएकदेशोऽस्याः टाप्। कन्थारीवृक्षे तीक्ष्णकण्टकायाम् राजनि०।

क्रूरदृश् त्रि०क्रूरा दृग् यस्य, क्रूरं पश्यति दृश—क्विन् २त० स० वा। १पिशुने खले २शनैश्चरग्रहे पु० मेदि०। ३मङ्गलग्रहे "आरोवक्रः क्रूरदृक् चावनेयः" ज्यो०त०। कर्म्म०। नील० ता० उक्ते स्थानविशेषस्थितानां ग्रहाणां स्थानविशेषे ४क्षुताख्यदृष्टौ रिपुदृष्टौ स्त्री। ३५५पृ०अरिशब्दे विवृतिः। क्रूरस्य ग्रहविशेषस्य दृक्। ५पापग्रहदृष्टौ स्त्री।